# .. Shri Hemakamaxidandakam ..

# ॥ શ્રીહેમકામાક્ષીદણ્ડકમ્ ॥

## Document Information

Text title : hemakAmAxIdaNDakam
File name : hemakAmAkShI.itx
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : N.Balasubramanian bbalu at satyam.net.in
Proofread by : N.Balasubramanian bbalu at satyam.net.in
Latest update : April 25, 2008
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીહેમકામાક્ષીદણ્ડકમ્ ॥

ઓંકારાત્મક-ભાસિ-રૂપ્યવલયે સંશોભિ હેમં મહઃ
બિભ્રત્કેલિશુકં ત્રયીકલગિરં દક્ષેણ હસ્તેન ચ।
વામે લંબકરં ત્રિભઙ્ગિ-સુભગં દીનાર્તનમ્રત્પદં
સ્વાન્તે દીવ્યતુ મે કટાક્ષ-શુભદં મન્દસ્મિતોદારકમ્ ॥

દક્ષિણે કામજિદ્યસ્યાઃ ચૂડાયાં કામવલ્લભઃ।
વાસઃ કામાયુધસ્યાધઃ કામાક્ષીં તાં નમામ્યહમ્ ॥

કામાન્ધા તિલકં યસ્યાઃ કામમાલી ચ પુત્રકઃ।
કામાન્ધોપમ-વાણીં તાં કામાક્ષીં પ્રણમામ્યહમ્ ॥

ગાઙ્ગમાતા તુ યા દેવી ગાઙ્ગમાલા-વિરાજિતા।
ગાં ગતા રક્ષિતું મર્ત્યાન્ ગાઙ્ગદેહાં નમામિ તામ્ ॥

જયૈકામ્રેશ્વરાર્ધાઙ્ગિ જય તઞ્જા-વિલાસિનિ।
જય બઙ્ગારુકામાક્ષિ જય સર્વાર્થ-દાયિનિ ॥

જય જનનિ સુરાસુરસ્તોમ-સંસેવ્યમાનાતિપુણ્યપ્રદેશ-પ્રમુખ્યામધિષ્ઠાય
કાઞ્ચીં સ્વમૂલસ્વરૂપેણ ભક્તેષ્ટ-સન્દાનચિન્તામણે! મઞ્જુસંભાષણે!
ભામણે!

મૂલદેવીતૃતીયાક્ષિસઞ્જાત-તેજોનુરૂપાં સુવર્ણાં સુમૂર્તિં વિધાયામ્બ!
વણીપતિસ્ત્વાં ધ્રુવે ચૈકદેશે પ્રતિષ્ઠાપ્ય કાઞ્ચ્યાં
વિવાહોત્સવં ચારુ નિર્વૃત્ય ચૈકામ્રનાથેન
કામાક્ષિ! સંયોજયામાસ ચાકાશભૂપાલમેવાત્ર કર્તું મહં તે સદા ॥

કામકોટી સુપીટાવમર્દેન નષ્ટેક્ષણઃ પદ્મભૂ-શ્ચક્રપૂજાં તથારાધનં તે
સ્વનુષ્ઠય ચક્ષુઃ પ્રકાશં પ્રપેદે ભૃશં ॥

યવનજનિત-ઘોરકર્નાટકાનીક-કાલે નુ
દુર્વાસસશ્શિષ્યમુખ્યૈર્-વરસ્થાનિકૈ-રાશુ શેઞ્જિં
પ્રપદ્યામ્બ! સન્તાનભૂપાલસંપૂજિતાઽભૂઃ॥

તતશ્ચોડ્યાર્પાલય-સ્વામિના ત્વં સમારાધિતાઽઽસી-શ્ચિરાયાઽથ
ગત્વા બહૂન્ ગ્રામદેશાન્મુદા હાટકક્ષેત્ર-સંશોભમાના સુદીર્ઘાસ્સમા-સ્તત્ર
નીત્વાઽથ, તઞ્જાપુરાધીશ-ભાગ્યપ્રકર્ષેણ
સંપ્રાપ્ય તઞ્જાં ચ પૂતાં, સુહત્તૂલજેન્દ્રાખ્યરાજેનસંસ્થાપિતાઽસ્મિન્
શુભે મન્દિરે રામકૃષ્ણાલયાભ્યન્તરાભાસિ તેન પ્રદત્તાં ભુવં ચાપિ
લબ્ધ્વાઽત્ર દુર્વાસસાઽઽદિષ્ટ-

સૌભાગ્યચિન્તામણિપ્રોક્તપૂજાં નુ કુર્વન્તિ તે સાધવઃ॥

શરભમહિપ-વર્ધિતાનેકભાગં ચ તે મન્દિરં
કાઞ્ચીપીઠાધિનાથપ્રકાણ્ડૈરથો ધર્મકર્તૃ-
પ્રમુખ્યૈશ્ચ દેવાલયાનલ્પવિત્તવ્યયેનાતિનૂત્નીકૃતં તત્ ॥

શ્શાઙ્કાવતંસે, સુગત્યા જિતોન્મત્તહંસે, રુચાતીતહંસે, નતાંસે ॥

તુલામીનમાસાત્તસત્ફલ્ગુનીઋક્ષ શોભાદિનેષ્વત્ર જન્મોદ્વહાદ્યુત્સવં,
શારદે રાત્રિકાલે પ્રમુખ્યોત્સવં
ચાતિસંભારપૂર્વેણ દિવ્યાભિષેકેણ સંભાવન્ત્યમ્બ!
તે ભક્તવૃન્દાઃ॥સદાનન્દકન્દે! સુમાતઙ્ગનન્દે!
અચ્છકુન્દાભદન્તે! શુભે! ગન્ધમાર્જારરેતો-ઽભિસંવાસિતે!
જાનકીજાનિ-સંવન્દિતે! જામદગ્ન્યેન સન્નન્દિતે!

મધુર-સુકવિમૂકસંશ્લાધિતે! પૂજ્યદુર્વાસ-સારાધિતે!
ધૌમ્યસદ્ભક્ત-સંભાવિતે! શઙ્કરાચાર્ય-સંસેવિતે!
કાઞ્ચિપીઠેશ્વરૈઃ પૂજિતે! શ્યામશાસ્ત્રીતિ-વિખ્યાત-સઙ્ગીતરાટ્-કીર્તિતે!
તઞ્ઞપૂર્વાસિ-સૌભાગ્યદાત્રીં પવિત્રીં સદા ભાવયે ત્વાં વરાકાઃ ॥

કૃપાસાન્દ્ર-દૃષ્ટિં કુરુષ્વામ્બ! શીઘ્રં મનઃ
શુદ્ધિમચ્છાં ચ દેહ્યાત્મવિદ્યાં ક્ષમસ્વાપરાધં
મયા યત્કૃતં તે, પ્રયચ્છાત્ર-સૌખ્યં પરત્રાપિ નિત્યં,
વિધેહ્યઙ્ઘ્રિપદ્મે દૃઢાં ભક્તિમારાત્,
નમસ્તે શિવે દેહિ મે મઙ્ગલં, પાહિ કામાક્ષિ માં, પાહિ કામાક્ષિ મામ્ ॥

॥ ૐ તત્સત્ ॥

Encoded and proofread by
N. Balasubramanian bbalu at satyam.net.in

.. Shri Hemakamaxidandakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*